लुप्तं, क्ली, (लुप्+क्तः।) चौर्य्यधनम्। लोत इति ख्यातम्। इति शब्दरत्नावली॥ लोपवति, त्रि। यथा,—
"वसुमानिति लुप्तार्णं चाण्डालं ब्राह्मणेति च। प्रशंसा निन्दनं द्वेषात् परत्वात्र विशिष्यते॥"
इति तिथ्यादितत्त्वम्॥
(यथा च, आर्य्यासप्तशत्याम्। ३६३।
"परिहृतनाभि लुप्तत्रिवलि श्यामस्तनाग्रमलसाचि।
बहुधवलजघनरेखं वपुर्न पुरवयितं सहते॥")

लुब, कि द अर्द्दने। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) कि, लुम्बयति लम्बति। द, लुम्बते। अर्द्दनं वधः। इति दुर्गादासः॥

लुब्धः, पुं, (लुभ+गर्द्धेति क्तः।) व्याधः। (यथा, महाभारते। १६।४।२१।
"स संनिरुद्धेन्द्रियवाड्मनास्तु
शिश्ये महायोगमुपेत्य कृष्णः।
जराथ तं देशमुपाजगाम
लुब्धस्तदानीं मृगलिप्सुरुग्रः॥")
लम्पटः। इति शब्दरत्नावली॥

लुब्धः, त्रि, (लुभ+क्तः।) आकाङ्क्षी। इति मेदिनी। धे, १४॥ तत्पर्य्यायः। गृध्नुः २। गर्द्धनः ३ अभिलाषुकः ४ तृष्णक् ५। इत्यमरः॥ (यथा, कथासरित्सागरे। ५५।३०।
"लुब्धो यशसि सत्यर्थे भीतः पापान्न प्रचुरः। मूर्खः परापवादेषु न च शास्त्रेषु योऽभवत्॥")

लुब्धकः, पुं, (लुब्ध एव। स्वार्थे कन्।) व्याधः। इत्यमरः॥ (यथा, कथासरित्सागरे। ८।२४।
"आत्मानकमीदृशं मांसं ददते लुब्धका इति॥")
लम्पटः। इति लुब्धशब्दार्थदर्शनात्॥ (पामुः। यथा, भागवते। ४।२५।५३।
"निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरञ्जनः। वैशसं नाम विषयं लुब्धकेन समन्वितः॥")

लुभ, य इर् गार्द्ध्ये। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) गार्द्ध्यमाकाङ्क्षा। य, लुभ्यति धनं लुब्धः। इर्, अलुभत् अलोभीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

लुभ, श विमोहने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) श, लुभत्यात्मनि कामे च। इति हलायुधः॥ लोभिता लोब्धा। इति दुर्गादासः॥ [क्तप्रत्ययेन निष्पन्नः॥

लुभितः, त्रि, विमोहितः। विमोहनार्थलुभधातोः

लुल, विमर्द्दने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शौचधातुरयम्। लुलापः। इति दुर्गादासः॥

लुलापः, पुं, (लुल्यते इति। लुल विमर्द्दने+भिदादित्वात् अङ्। लुलां आप्नोतीति। आप्+अण्।) महिषः। इत्यमरः॥ (यथा, दुर्गाभक्तितरङ्गिण्याम्।
"लुलापं खड्गेन छिन्धि छिन्धि॥")
(तथास्य पर्य्यायः।
"महिषो घोटकारिः स्यात्कासरश्च रजस्वलः।
पीनस्कन्धः कृष्णकायो लुलापो यमवाहनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

लुलापकन्दः, पुं, (लुलापप्रियः कन्दः।) महिषकन्दः। इति राजनिर्घण्टः॥

लुलापकान्ता, स्त्री, (लुलापस्य कान्ता।) महिषी। इति राजनिर्घण्टः॥

लुलितः, त्रि, (लुल+क्तः।) आन्दोलितः। यथा,
"प्रेङ्खोलितस्तरलितो लुलितान्दोलिताषपि॥"
इति भूरिप्रयोगः॥
(यथा, कथासरित्सागरे। ३७।७०।
"हत्वा रथान्वीक्ष्य छिन्द शिरो लुलितकुण्डलम्॥"
विकीर्णः। इति श्रीधरः॥ यथा, भागवते। १।९।३४।
"युधि तुरगरजो विधूम्रविष्वक्
कचलुलितश्रमवार्य्यलङ्कृतास्ये॥"
म्लानः। यथा, रामायणे। २।६५।१९।
"न स्म विभ्राजते देवी शोकाश्रुलुलितानना॥"
म्लानः। यथा, आर्य्यासप्तशत्याम्।
"प्रातर्निद्राति यथा यथालसा लुलितनिःसहैरङ्गैः।
जामातरि मुदितमनास्तथा तथा सादरा श्वश्रूः॥"
उन्मूलितः। यथा, भागवते। ३।१९।२४।
"विशीर्णबाह्वङ्घ्रिशिरोरुहोऽपतत्
यथा नगेन्द्रो लुलितो नभस्वता॥"
स्खलितः। यथा, तत्रैव। ४।६।१०।
"किमम्बकाशिलुलितात् पततां विमानात्॥"
विध्वस्तः। यथा, तत्रैव। ७।६।२३।
"येऽस्मत्पितुः कुपितहासविजृम्भितभ्रूविस्फूर्ज्जितेन लुलिताः स तु ते निरस्तः॥")

लुष, स्तेये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) लोषति। इति दुर्गादासः॥

लुष, हिंसने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) शौचधातुरयम्। लुष्टः। इति दुर्गादासः॥

लुषभः, पुं, (रोषतीति। रुष हिंसायाम्+"रुषेर्निलुक् च।" उणा० ३।१२४। इति अभच्। लुषादेशश्च धातोः।) मत्तहस्ती। इत्युणादिकोषः॥

लुह, औ गार्द्ध्ये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) औ, अलुहत्। गार्द्ध्यं वाञ्छमिच्छा। लोहति धनं लोकः। इति दुर्गादासः॥

लू, ञ गि छिदि। इति कविकल्पद्रुमः॥ (क्र्या०-उभ०-सक०-अनिट्।) ञ गि, लुनाति लुनीते। लूनः लूनिः। इति दुर्गादासः॥

लूता, स्त्री, (लुनातीति। लू+बाहुलकात् तन्। गुणाभावश्च।) कीटविशेषः। माकड्सा इति भाषा। तत्पर्य्यायः। तन्तुवायः २ ऊर्णनाभः ३ मर्कटकः ४। इत्यमरः॥ मर्कटः ५ लूतिका ६ ऊर्णनाभिः ७ शुनकः ८ तन्तुवायः ९। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ५०४।
"लूतातन्तुनिरुद्धद्वारः शून्यालयः पतत्पतगः।
पथिके तस्मिन्नचलपिहितमुखो रोदितीव सखि!॥")
पिपीलिका। रोगविशेषः। इति मेदिनी। ते, ५२॥ शेषस्य पर्य्यायः। मर्म्मभित् २ हूका ३। इति राजनिर्घण्टः॥ तद्रोगस्य निदानादि लूतानां जन्तुविशेषाणामुत्पत्तिं सङ्ख्याश्चाह।
"यस्मात्लूनतृणं प्राप्ता मुनेः प्रस्वेदविन्दवः।
तेभ्यो जातास्ततो लूता इति ख्यातास्तु षोडश॥"
अत्र सुश्रुतः।
"विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम्।
वशिष्ठं कोपयामास गत्वाश्रमपदं किल॥
कुपितस्य मुनेस्तस्य ललाटे स्वेदविन्दवः।
अपतन् दर्शनादेव शुष्कस्तात्तीव्रवर्च्चसः॥
लूने तृणे महर्षेस्तु धेन्वर्थं संभृतेऽपि च।
ततो जातास्त्विमा घोरा नानारूपा महाविषाः।
तासामष्टौ कष्टसाध्या वर्ज्यास्तावन्त एव हि॥"
तत्र त्रिमण्डलाप्रभृतयोऽष्ट कष्टसाध्याः। सौवर्णिकाप्रभृतयोऽष्टावसाध्याः। तासां सामान्यतो दंशलक्षणमाह।
"ताभिर्दष्टे दंशकोथ्यप्रवृत्तिः क्षतजस्य च।
ज्वरो दाहोऽतिसारश्च गदाः स्युश्च त्रिदोषजाः॥
पिड़का विविधाकारा मण्डलानि महान्ति च।
शोथा महान्तो मृदवो रक्ताः श्यावाश्चलास्तथा।
सामान्यं सर्व्वलूतानामेतद्दंशस्य लक्षणम्॥"
दंशकोथ्यदंशमध्ये पूतिभावः।
"दंशमध्ये तु यत् कृष्णं श्यावं वा जालकावृतम्।
दग्धाकृति भृशं पाकं क्लेदशोथज्वरान्वितम्।
दूषीविषाभिर्लूताभिस्तद्दष्टमिति निर्द्दिशेत्॥"
सौवर्णिकादयोऽष्टावसाध्यास्तद्दष्टानां लक्षणमाह।
"शोथः श्वेतासिता रक्ता पीता च पिड़का ज्वरः।
प्राणान्तिको भवेद्दाहः श्वासो हिक्का शिरोग्रहः॥ *॥"
तस्यौषधं यथा,—
"रजनीयुग्मपतङ्गमञ्जिष्ठानागकेशरैः।
शीताम्बुपिष्टैरालेपः सद्यो लूतां विनाशयेत्॥"
अपि च।
"अभयां रोचनां कुष्ठमकेयुग्मं तथोत्पलम्।
जलवेतसमूलानि गरलं सुरसां तथा॥
चकलिङ्गं समञ्जिष्ठामनन्तां मृतावरीम्।